श्री सूर्य स्तुतिः (ब्रह्म कृतं)

श्री सूर्य स्तुतिः (ब्रह्म कृतं)

ब्रह्मोवाच |
आदिदेवोऽसि देवानामैश्वर्याच्च त्वमीश्वरः |
आदिकर्ताऽसि भूतानां देवदेवो दिवाकरः || 1 ||

जीवनः सर्वभूतानां देवगंधर्वरक्षसां |
मुनिकिन्नरसिद्धानां तथैवोरगपक्षिणां || 2 ||

त्वं ब्रह्मा त्वं महादेवस्त्वं विष्णुस्त्वं प्रजापतिः |
वायुरिंद्रश्च सोमश्च विवस्वान् वरुणस्तथा || 3 ||

त्वं कालः सृष्टिकर्ता च हर्ता भर्ता तथा प्रभुः |
सरितः सागराः शैला विद्युदिंद्रधनूंषि च || 4 ||

प्रळयः प्रभवश्चैव व्यक्ताव्यक्तः सनातनः |
ईश्वरात्परतो विद्या विद्यायाः परतः शिवः || 5 ||

शिवात्परतरो देवस्त्वमेव परमेश्वरः |
सर्वतः पाणिपादांतः सर्वतोक्षिशिरोमुखः || 6 ||

सहस्रांशुः सहस्रास्यः सहस्रचरणेक्षणः |
भूतादिर्भूर्भुवः स्वश्च महः सत्यं तपो जनः || 7 ||

प्रदीप्तं दीपनं दिव्यं सर्वलोकप्रकाशकं |
दुर्निरीक्ष्यं सुरेंद्राणां यद्रूपं तस्य ते नमः || 8 ||

सुरसिद्धगणैर्जुष्टं भृग्वत्रिपुलहादिभिः |
स्तुतस्य परमव्यक्तं यद्रूपं तस्य ते नमः || 9 ||

वेद्यं वेदविदां नित्यं सर्वज्ञानसमन्वितं |
सर्वदेवाधिदेवस्य यद्रूपं तस्य ते नमः || 10 ||

विश्वकृद्विश्वभूतं च वैश्वानरसुरार्चितं |
विश्वस्थितमवेद्यं च यद्रूपं तस्य ते नमः || 11 ||

परं यज्ञात्परं वेदात्परं लोकात्परं दिवः |
परमात्मेत्यभिख्यातं यद्रूपं तस्य ते नमः || 12 ||

अविज्ञेयमनालक्ष्यमध्यानगतमव्ययं |
अनादिनिधनं चैव यद्रूपं तस्य ते नमः || 13 ||

नमो नमः कारणकारणाय
नमो नमः पापविमोचनाय |
नमो नमस्तेऽदितिवंदिताय
नमो नमो रोगविनाशनाय || 14 ||

नमो नमः सर्ववरप्रदाय
नमो नमः सर्वसुखप्रदाय |
नमो नमः सर्वधनप्रदाय
नमो नमः सर्वमतिप्रदाय || 15 ||

इति श्रीब्रह्मपुराणे एकत्रिंशोऽध्याये ब्रह्मकृत श्री सूर्य स्तुतिः |